मध्ये सुतैः पञ्चभिरभ्युपेता
शिवान्विता पिष्टमयी प्रमत्ता ।
पूज्या शिवा तुष्यति भक्तियोगात्
प्रभूतपुष्पाक्षतधूपदीपैः ॥
साज्यगुडौदनमाषकुलत्थै-
र्यावकपूपलिकामिषमद्यैः ।
संभृतिरत्र नरासनमात्रं
वृद्धिमता बलिकर्म्मणि कार्य्या ॥
प्राप्याष्टमीं वाथ चतुर्द्दशीं वा
संमन्त्र्य मन्त्रेण च सप्तकृत्वः ।
बलिं शिवाया निशि निश्चयेन
दद्यान्मनुष्यो यदि भद्रमिच्छेत् ॥

अत्र मन्त्रः । ॐ शिवे ज्वालामुखि बलिं गृहाण गृहाण हुँ फट् स्वाहा । ॐ शिवे शिवदूति भगवति चण्डे इदमर्घ्यं बलिलीलासमुचितं गृहाण गृहाण आगच्छ आगच्छ वायुवेगेन शुभं कुरु कुरु स्वाहा । इत्यर्घ्यमन्त्रः । बलिदानाय मन्त्रान्तरम् । ॐ नमो भगवति एनं एनं बलिं गृह्ण गृह्ण गन्धपुष्पधूपदीपादिकं दह दह पच पच घोररूपिणि भो भगवति पिबत पिबत स्वाहा ।

एतस्य मन्त्रद्वितयस्य मध्या-
देकेन केनाप्यभिमन्त्रणीयः ।
बलिः शिवायाः सुमहाप्रभावं
पृथक् पृथक् मन्त्रयुगं यदेतत् ॥
ताम्बूलवस्त्राभनदक्षिणाभि-
र्नैमित्तिकं शाकुनशास्त्रदक्षम् ।
प्रपूजयेत्तत्र भवत्यभीष्ट-
माचार्य्यवर्य्ये परितोषिते हि ॥
अश्लेषिकावह्निक्षतान्तरुद्र-
धिष्ण्यानि पूर्व्वोक्तनयेन सार्द्धम् ।
व्यस्तांश्च सन्त्यज्य विरौति येषु
श्रेयस्करी जम्बुकगेहिनी सा ॥
हितैषिणी सर्व्वममीहितेषु
देवी भवानी भुवि फेरवा च ।
कृताधिवासा कृपया सदैव
शिवारुतं तेन यतेत विद्वान् ॥"

इति श्रीवसन्तराजशाकुने सदागमार्थशोभने समस्तसत्यकौतुके विरचितं शिवारुतं षष्ठम् ॥*

अथ तान्त्रिकशिवाबलिः । तदुक्तं कुलचूडामणौ
"बिल्वमूले प्रान्तरे वा श्मशाने वाथ साधकः ।
मांसप्रधानं नैवेद्यं सन्ध्याकाले निवेदयेत् ॥
कालि कालीति वक्तव्यं ततः सा शिवरूपिणी
पशुरूपा समायाति परिवारगणैः सह ॥
भुक्त्वा रौति यदैशान्यां मुखमुत्तोल्य सुस्वरम् ।
तदैव मङ्गलं तस्य नान्यथा कुलभूषण ॥
अवश्यमन्नदानेन नियतं तोषयेच्छिवाम् ।
नित्यश्राद्धं तथा सन्ध्यावन्दनं पितृतर्पणम् ॥
तथैव कुलसेव्यानां नित्यता कुलपूजने ।
पशुरूपां शिवां देवीं यो नार्च्चयति निर्ज्जने ॥
शिवारावेण तस्याशु सर्व्वं नश्यति निश्चितम् ।
जपपूजाविधानानि यत्किञ्चित सुकृतानि च ।
गृहीत्वा शापं दत्त्वा च शिवा रोदिति निर्ज्जने ॥
एकया भुज्यते यत्र शिवया देव भैरव ।
तत्रैव सर्व्वशक्तीनां प्रीतिः परमदुर्लभा ॥
पशुशक्तिः पक्षिशक्तिर्नरशक्तिर्यथाक्रमात् ।
पूजनात् द्विगुणं कर्म्म मङ्गलं साधयेत्ततः ॥
तेन सर्व्वप्रयत्नेन कर्त्तव्यं पूजनं महत् ।
राजादिभयमापन्ने देशान्तरभयादिके ॥
शुभाशुभानि कर्म्माणि विचिन्त्य बलिमाहरेत् ।
गृह्ण देवि महाभागे शिवे कालाग्निरूपिणि ॥
शुभाशुभफलं व्यक्तं ब्रूहि गृह्ण बलिं तव ।
एवमुच्चार्य्य दातव्यो बलिः कुलजनप्रियः ॥
यदि नो भुज्यते वत्स तदा नैव शुभं भवेत् ।
शुभं यदि भवेत्तत्र भुज्यते तदशेषतः ।
एवं ज्ञात्वा महादेव शान्तिस्वस्त्ययनं चरेत् ॥"
इति तन्त्रसारः ॥

शिवाक्षं, क्ली, (शिवस्याक्षि कारणत्वेनास्त्यस्येति । अच् ।) रुद्राक्षम् । इति राजनिर्घण्टः ॥ (अस्य विवरणं रुद्राक्षशब्दे द्रष्टव्यम् ॥)

शिवाटिका, स्त्री, वंशपत्री । इति भावप्रकाशः ॥

शिवात्मकं, क्ली, (शिवः सुखकरः आत्मा स्वरूपो यस्य ।) सैन्धवम । इति राजनिर्घण्टः ॥ शिवमये, त्रि ॥

शिवानी, स्त्री, (शिवस्य भार्य्या । यद्वा, शिवं मङ्गलमानयतीति । आ + नी + डः । गौरादित्वात् ङीष् ।) दुर्गा । इति लोकप्रसिद्धिः ॥ जयन्तीवृक्षः । इति शब्दचन्द्रिका ॥

शिवाप्रियः, पुं, (शिवायाः प्रियः ।) छागः । इति त्रिकाण्डशेषः ॥ शिवस्य शिवाया अपि प्रियवस्तुनि शिवाया वल्लभे च त्रि ॥

शिवापीडः, पुं, (शिवस्यापीड इव ।) वकवृक्षः । इति राजनिर्घण्टः ॥ शिवाशिवयोः शेखरश्च ॥

शिवाफला, स्त्री, (शिवाया इव फलमस्याः ।) शमीवृक्षः । इति राजनिर्घण्टः ॥

शिवारातिः, पुं, (शिवायाः शृगालस्यारातिः ।) कुक्कुरः । इति शब्दमाला ॥ शिवाशिवयोः शत्रुश्च ॥

शिवालयं, क्ली, (शिवा आलीयतेऽत्रेति । आ + ली + अच् ।) श्मशानम् । इति हारावली ॥ (यथा, कथासरित्सागरे । २ । २२ ।
"बल्यर्थं युद्धमानी च पुत्त्वे शून्ये शिवालये ॥")

शिवालयः, पुं, (शिवायाः शिवस्य वा आलयः ।) रक्ततुलसी । इति शब्दचन्द्रिका ॥ शिवस्य गृहम् । यथा, रामार्च्चनचन्द्रिकायाम् ।
"चन्द्रसूर्य्यग्रहे तीर्थे सिद्धक्षेत्रे शिवालये ।
मन्त्रमात्रप्रकथनमुपदेशः स उच्यते ॥"
इति तिथ्यादितत्त्वम् ॥

शिवालुः, पुं, शृगालः । इति राजनिर्घण्टः ॥

शिवा(ब)वलिः, पुं, (शिवाभ्यो दीयमानो बलिः ।) रात्रौ शिवादेयमांसप्रधाननैवेद्यम् । यथा ।
अथ शिवाबलिः । कुलचूडामणौ ।
"बिल्वमूले प्रान्तरे वा श्मशाने वापि साधकः
मांसप्रधाननैवेद्यं सन्ध्याकाले निवेदयेत् ॥
कालि कालीति वक्तव्ये ततोमा शिवरूपिणी ।
पशुरूपधरायाति परिवारगणैः सह ॥
भुक्त्वा रौति यदैशान्यां मुखमुत्तोल्य सुस्वरम् ।
तदैव मङ्गलं तस्य नान्यथाकुल भूषण ॥
अवश्यमन्नदानेन नियतं तोषयेच्छिवाम् ।
नित्यश्राद्धं तथा सन्ध्यावन्दनं पितृतर्पणम् ॥
तथैव कुलसेव्यानां नित्यता कुलपूजने ।
पशुरूपां शिवां देवीं यो नार्च्चयति निर्ज्जने ॥
शिवारावेण तस्याशु सर्व्वं नश्यति निश्चितम् ।
जपपूजाविधानानि यत्किञ्चित् सुकृतानि च ॥
गृहीत्वा शापं दत्त्वा च शिवा रोदिति निर्ज्जने ।
एकया भुज्यते यत्र शिवया देव भैरव ॥
तत्रैव सर्व्वशक्तीनां प्रीतिः परमदुर्ल्लभा ।
पशुशक्तिः पक्षिशक्तिर्नरशक्तिर्यथाक्रमात् ॥
पूजनात् द्विगुणं कर्म्म मङ्गलं साधयेत्ततः ।
तेन सर्व्वप्रयत्नेन कर्त्तव्यं पूजनं महत् ॥*॥
राजादिभयमापन्ने देशान्तरभयादिके ।
शुभाशुभानि कर्म्माणि विचिन्त्य बलिमाहरेत् ॥
गृह्ण देवि महाभागे शिवे कालाग्निरूपिणि ।
शुभाशुभफलं व्यक्तं ब्रूहि गृह्ण बलिं तव ॥
एवमुच्चार्य्य दातव्यो बलिः कुलजनप्रियः ।
यदि न भुज्यते वत्स तदा नैव शुभं भवेत् ॥
शुभं यदि भवेत्तत्र भुज्यते तदशेषतः ।
एवं ज्ञात्वा महादेव शान्तिस्वस्त्ययनं चरेत् ॥
नैवेद्योपरि मूलमन्त्रमष्टोत्तरशतं जप्त्वा बलिं दद्यादिति शेषः । ।" इति तन्त्रसारः ॥

शिवास्मृतिः, स्त्री, जयन्तीवृक्षः । इति शब्दचन्द्रिका ॥

शिवाह्लादः, पुं, (शिवस्याह्लादो यस्मात् ।) वकवृक्षः । इति राजनिर्घण्टः ॥ शिवस्यानन्दश्च ॥

शिवाह्वा, स्त्री, (शिवेन आह्वा यस्याः ।) रुद्रजटा इति राजनिर्घण्टः ॥ शिवनामके त्रि, ॥

शिविः, पुं, हिंस्रपशुः । इति त्रिकाण्डशेषः ॥ भूर्ज्जवृक्षः । राजविशेषः । स च उशीनरराजपुत्रः । इति मेदिनी ॥ तस्य चरित्रं यथा,—
मैत्रेय उवाच ।
"शृणु राजन्! प्रवक्ष्यामि स्वमांसं शिविना यथा
समांशं दत्तवान् सत्यं पुरा शौशीनरो युवा ॥
सत्यदानरतं ज्ञात्वा शिविमिन्द्राशुशुक्षणी ।
जिज्ञासार्थं समेयातां वर्त्तमाने महाध्वरे ॥
वह्निर्भूत्वा कपोतस्तु हरिश्येनपुरःसरः ।
शरणार्थी महीपालं निलिल्ये भयविह्वलः ॥
त्राहि मां पृथिवीपालेत्यवदत् श्येनजाद्भयात् ।
स तमाश्वासयामास कपोतं शरणागतम् ॥
राजानमुपगम्याथ श्येनः प्रोवाच संसदि ।
वचनं शृणु मे राजन् ! क्षुधार्त्तस्य कुटुम्बिनः ॥
धर्म्मात्मानं त्वामाहुर्वै पृथिव्यां सर्व्वपार्थिवाः ।
तद्विरुद्धं कथं कर्म्म कर्त्तुमिच्छसि पार्थिव ॥
सर्व्वस्य सम्पदः स्वार्थाः स्वपरार्थास्तु कस्यचित् ।
परार्था भवतो नित्यं सफलस्य तरोरिव ॥
नोपकारपरेऽप्येवमुपकारपरो जनः ।
अपकारपरेऽपि त्वमुपकारपरः सदा ॥
ममैव विहितो धात्रा भक्ष्योऽयं त्वं समुत्सृज ।